শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে দশমস্কন্ধে

# ॥শ্রী রুক্মিণীস্তৱনম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রুক্মিণীস্তৱনম্ ॥

শ্রীরুক্মিণ্যুৱাচ
নন্ৱেৱমেতদরৱিন্দৱিলোচনাহ
    যদ্ৱৈ ভৱান্ ভগৱতোঽসদৃশী ৱিভূম্নঃ।
ক্ব স্বে মহিম্ন্যভিরতো ভগৱাংস্ত্র্যধীশঃ
    ক্বাহং গুণপ্রকৃতিরজ্ঞগৃহীতপাদা ॥ 1 ॥

সত্যং ভযাদিৱ গুণেভ্য উরুক্রমান্তঃ
    শেতে সমুদ্র উপলম্ভনমাত্র আত্মা।
নিত্যং কদিন্দ্রিযগণৈঃ কৃতৱিগ্রহস্ত্বং
    ৎৱৎসেৱকৈর্নৃপপদং ৱিধুতং তমোঽন্ধম্ ॥ 2 ॥

ৎৱৎপাদপদ্মমকরন্দজুষাং মুনীনাং
    ৱর্ত্মাস্ফুটং নৃপশুভির্ননু দুর্ৱিভাৱ্যম্।
যস্মাদলৌকিকমিৱেহিতমীশ্ৱরস্য
    ভূমংস্তৱেহিতমথো অনু যে ভৱন্তম্ ॥ 3 ॥

নিষ্কিঞ্চনো ননু ভৱান্ ন যতোঽস্তি কিঞ্চিদ্
    যস্মৈ বলিং বলিভুজোঽপি হরন্ত্যজাদ্যাঃ।
ন ৎৱা ৱিদন্ত্যসুতৃপোঽন্তকমাঢ্যতান্ধাঃ
    প্রেষ্ঠো ভৱান্ বলিভুজামপি তেঽপি তুভ্যম্ ॥ 4 ॥

ৎৱং ৱৈ সমস্তপুরুষার্থমযঃ ফলাত্মা
    যদ্ৱাঞ্ছযা সুমতযো ৱিসৃজন্তি কৃৎস্নম্।

তেষাং ৱিভো সমুচিতো ভৱতঃ সমাজঃ
পুংসঃ স্ত্রিযাশ্চ রতযোঃ সুখদুঃখিনোর্ন॥ **5** ॥

ৎৱং ন্যস্তদণ্ডমুনিভির্গদিতানুভাৱ
আত্মাঽঽত্মদশ্চ জগতামিতি মে ৱৃতোঽসি।
হিৎৱা ভৱদ্ভ্রুৱ উদীরিতকালৱেগ -
ধ্ৱস্তাশিষোঽব্জভৱনাকপতীন্ কুতোঽন্যে॥ **6** ॥

জাড্যং ৱচস্তৱ গদাগ্রজ যস্তু ভূপান্
ৱিদ্রাৱ্য শার্ঙ্গনিনদেন জহর্থ মাং ৎৱম্।
সিংহো যথা স্ৱবলিমীশ পশূন্ স্ৱভাগং
তেভ্যো ভযাদ্ যদুদধিং শরণং প্রপন্নঃ॥ **7** ॥

যদ্ৱাঞ্ছযা নৃপশিখামণযোঽঙ্গৱৈন্য -
জাযন্তনাহুষগযাদয ঐক্যপত্যম্।
রাজ্যং ৱিসৃজ্য ৱিৱিশুর্ৱনমম্বুজাক্ষ
সীদন্তি তেঽনুপদৱীং ত ইহাস্থিতাঃ কিম্॥ **8** ॥

কান্যং শ্রযেত তৱ পাদসরোজগন্ধম্
আঘ্রায সন্মুখরিতং জনতাপৱর্গম্।
লক্ষ্ম্যালযং ৎৱৱিগণয্য গুণালযস্য
মর্ত্যা সদোরুভযমর্থৱিৱিক্তদৃষ্টিঃ॥ **9** ॥

তং ৎৱানুরূপমভজং জগতামধীশম্
আত্মানমত্র চ পরত্র চ কামপূরম্।
স্যান্মে তৱাঙ্ঘ্রিররণং সৃতিভির্ভ্রমন্ত্যা
যো ৱৈ ভজন্তমুপযাত্যনৃতাপৱর্গঃ॥ **10** ॥

তস্যাঃ স্যুরচ্যুত নৃপা ভৱতোপদিষ্টাঃ
স্ত্রীণাং গৃহেষু খরগোশ্ৱবিডালভৃত্যাঃ।
যৎকর্ণমূলমরিকর্ষণ নোপযাযাদ্
যুষ্মৎকথা মৃডৱিরিঞ্চসভাসু গীতা॥ **11** ॥

ৎৱক্শ্মশ্রুরোমনখকেশপিনদ্ধমন্তঃ
মাংসাস্থিরক্তকৃমিৱিটকফপিত্তৱাতম্।
জীৱচ্ছৱং ভজতি কান্তমতির্ৱিমূঢা
যা তে পদাব্জমকরন্দমজিঘ্রতী স্ত্রী॥ **12** ॥

অস্ত্ৱম্বুজাক্ষ মম তে চরণানুরাগ
আত্মন্ রতস্য ময়ি চানতিরিক্তদৃষ্টেঃ।
যর্হ্যস্য ৱৃদ্ধয উপাত্তরজোঽতিমাত্রো
মামীক্ষসে তদু হ নঃ পরমানুকম্পা॥ **13** ॥

॥ ইতি শ্রী রুক্মিণীস্তৱনং সমাপ্তম্॥